नं० ४९२७

नाम – सप्तशती स्तोत्र पठन विधिः

कर्त्ता – ×

पत्र संख्या – ४ पत्राणि सं० ×

विषयः – तंत्रम्

सप्तशती स्तोत्र पठनविधिः

४५२७



स॰प्र॰ १

ॐ श्रीगणेशाय नमः ॥ श्रीमार्कंडेयेन क्रौष्टुकिंभागुरिं प्रत्युक्तं स्तोत्रं जैमिनिं प्रति पक्षिरूपैर्द्रोणपु
त्रैरुक्तं मार्कंडेयपुराणे तद्व्याख्यामतिव्याचक्ष्महे तत्रादौ व्याख्यास्यमानस्तोत्रस्तूयमानदेवता
स्वरूपं प्राधानिकरहस्याख्ये ग्रंथविशेषे उक्तं विविच्य दर्श्यते तत्रादौ राज्ञः प्रश्नः भगवन्नवतारा
मे चंडिकायास्त्वयोदिताः एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसीति अत्रैतेषामिति निर्धारणे
षष्ठी प्रकृतिं मूलकारणं तत्रोत्तरं सर्वस्याद्या महालक्ष्मीस्त्रिगुणा सकलेश्वरी लक्ष्याल
क्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता तत्र लक्ष्यस्वरूपमाह मातुलिंगं गदां खेटं पानपात्रं
च बिभ्रती नागं लिंगं च योनिं च बिभ्रती नृप मूर्धनि तप्तकांचनवर्णाभा तप्तकांचनभूषणेति
बीजपूरं गदां चर्म सीधुपात्रं च बिभ्रती नागं लिंगं च योनिं च वेणीं बिभर्ति सुंदरीति रुद्रयामले
अलक्ष्यरूपमाह शून्यं तदखिलं स्वेन पूरयामास तेजसेति लिंगं योनिं च बिभ्रती एतेनास्याः पुं
रूपत्वं स्त्रीरूपत्वं च ध्वनितं एतदेवरूपं प्रोवाच सदाशिवेनाप्युक्तः वेश्यावाचा महादेवेन शक्त्याम
हालक्ष्मीति लिंगं योनिं चेति जलहारीसहितं शिवमित्यर्थः वेणीमिति रुद्रयामलस्वरसा
त् इयं च महालक्ष्मीः [illegible]स्याः प्रथममध्यमोत्तरचरित्रत्रयदेवतासमष्टिरूपा सकलदेवीमा
हात्म्यदेवतेति बोध्यं एषा प्रोक्ता वैष्णवी च सदाशिवांकमारूढा शक्तिरिच्छारूपा शिवा म
हालक्ष्मीरिति ख्याता देवी सर्वगुणान्वितेति शिवपुराणात् लक्ष्मीतंत्रे विश्वशक्तिरूपया ल १

त्माघाकं प्रति कालादीनां स्वावतारभेदतोक्षेषु पतत्सु सार्वात्म्ये पर्यवस्यति मायाविशि
ष्टं ब्रह्मेदं प्रधानतत्त्वस्य ततो गुणत्रयविभागेनाह शून्यं तदखिलं लोकं विलोक्य परमेश्व
री बभार रूपमपरं तमसा केवलेन हि अत्र तमसः प्राधान्यमात्रं केवलेनेत्युक्तिः त
द्रूपमाह साभिन्नांजनसंकाशा दंष्ट्रांकितवरानना विशाललोचना नारी बभूव तनुम
ध्यमा खड्ग१पात्र२शिरः३खेटै४रलंकृतचतुर्भुजा कबंधहारं शिरसा बिभ्राणा
हि शिरःस्रजं सर्पमयीं शिरःस्रजमित्यर्थः मूर्ध्नि सर्पसहस्राणां स्रजं वै संदधीतदे
तियामलोक्तेः अस्या रूपेण तामसीत्वमुक्त्वा तदेव मोहजनकत्वोपपत्तये तानक
लाल्पत्वप्रदर्शनेन द्रढयति सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा नाम कर्म च
मे मातर्देहि तुभ्यं नमो नम इति महालक्ष्मीरपरं रूपं बभारेत्यनेन हि मूलप्रकृतेरस्या
स्वाभेदाधन्यते ततो महालक्ष्मीराह महामाया महाकाली महामारी क्षुधा तृषा निद्रा
तृष्णा चैकवीरा कालरात्रिर्दुरत्यया इमानि तव नामानि प्रतिपाद्यानि कर्मभिरिति इमाद्
यइत्यन्येवाहुरिति ततः तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप सत्त्वाख्येनातिशुद्धेन
गुणेनेंदुप्रभं दधौ चतुर्भुजा तु सा नारी श्वेतपर्वतसन्निभा अक्षमालांबुजधरा वीणापु
स्तकधारिणी सा बभूव वरा नारी नामान्यस्यै च सा ददौ अस्याः सत्त्वप्रधानत्वं दर्शयि

स॰ श॰ तेज्ञानकला तिरोभावाभावो नामादिप्रसंगाभावेन दर्शितः महाविद्या महावाणी भार
२ ती वाक्सरस्वती आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी इमां विस्तरित्येव एवं तद्रूपप्र
रमेनापि विसर्गः स्मरणात् अत्र तमः सत्वयोः प्रविभावो ज्ञा महालक्ष्मीरेव स्वयं रजः प्र
धानेन स्थिता तेनुक्तं भवति इमां ब्रह्मेत्यन्ते अलक्षं रूपं च सर्वं मूले चतुर्थं वेदितव्यं आसां च
मूलशक्त्याऽभेद उक्त एव परस्परमपि तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायेन बोध्यः
स्वस्वरूपांशेऽनावृतज्ञानत्वादासां तदभेदज्ञानमपि एवास्ति सापि कल्पा एव तस्मा
न कस्य पुरुषांतरानुक्तेः सर्वासां स्त्रीपुरुषोभयरूपता च अथोवाच महालक्ष्मीर्महा
कालीं सरस्वतीं एवं जनयतां देव्यौ मिथुने स्वानुरूपतः इदमाज्ञादानं संमतिरूपं बोद्धव्यं
इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयं हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ
ब्रह्मन्विधे विरिंच्येति धातरित्याह तं नरं श्रीपद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियं
मुख्यमात्रत्वं ततः प्रादुर्भावमात्रेण महाकाली भारती च मिथुने सृजतः सह नीलकं
[illegible] ठं रक्तबाहुं श्वेतांगं चंद्रशेखरं जनयामास पुरुषं महाकाली सितां स्त्रि
यं स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः त्रयी विद्या कामधेनुः सा
स्त्री भाषाक्षरा स्वरा सरस्वती स्त्रियं गौरी कृष्णं च पुरुषं नृप जनयामास नामा २

नितयोरपि वदामिते विस्नुः कृस्नो धरणीके प्रोवासुदेवोजनार्दनः उमागौरीसती चंडी सुंदरी सुभगा कृस्ना एवं पुरुषत्रयः स्वयः पुरुषतं प्रपेदिरे केवलपुरुषत्वमपीत्यर्थः प्रजाश्च न सर्ववे द्या स्तत्क्रियाचन सर्ववेद्यत्याह चक्षुष्मंतो न पश्यंति पश्यंतोनिद्रा नचक्षुष इति ज्ञाने वृतं स्व पपूपं तिनेतरेन विद्वुधा इतिपाठांतरं ततः ब्रह्मणे प्रददौ पत्नीं महालक्ष्मी स्त्रयी रु द्राय गौरीं वासुदेवाय च श्रियं तत्र सरस्वत्याः सहितानां क्रमेण ब्रह्मा सृष्ट्यधिका रं विस्नुः पालनाधिकारं रुद्रः संहाराधिकारं हृतवानित्यर्थः इयं त्रयी महाकाली जन्यत्वात् कार्यतस्तमोमयी सितोविद्यमित्युक्ते रूपतः सत्वमयी एवं च तमः सत्वयोल। संसर्गः ब्रह्मा च महालक्ष्मीजन्यत्वाद्धिरण्यगर्भोवित्युक्तेश्च रूपतः कर्मतश्च रजोमय इति तत्र रजोद्रेकगुणएवं विस्नुः सरस्वतीजन्यत्वात्सात्विकः कर्मतः कृस्ने वपुरुषामित्युक्तेः रूपतस्त मोमय इति तत्र सत्वतमसोः समता लक्ष्मी स्तु ब्रह्मवद्द्विगुणएरजोगुणा रुद्रो महाका लीजन्यत्वात्कर्मतस्तमोमयः श्वेतांगमित्युक्तेः रूपतः सत्वमय इति तत्र सत्वतमसोः साम्य गौरीतु सरस्वतीजन्यत्वाद्गौरीमित्युक्तेश्च कर्मतो रूपतश्च सत्वमपीतिसत्वद्वैगुण्यं तत्र अतएव तत्तद्गुणानुरूपं सृष्ट्यादिकर्म तेषां एवं च ब्रह्मविस्नुशिवाः स्त्रीपुंसमित्युक्तं

मिलित्वा गुणत्रयमपि शिवमिथुनेन तत्सर्वं त्रिगुणं प्रकृगुणं तमः रजसः सर्वथाऽभाव इति तत्वं
पतेप्रमथा ब्रह्मादयः तदग्रे ब्रह्मणो विष्णुर्विष्णोश्च ब्रह्मेति ब्रह्मधारा विष्णोर्ब्रह्मा ब्रह्मणो विष्णुरि।
ति विष्णुधारा रुद्रात् रुद्रस्तस्मात्पुना रुद्र इति रुद्रधारा सरस्वत्याः कालीकालीतः सरस्वती
ति सरस्वतीधारा लक्ष्म्या लक्ष्मी लक्ष्मीतो लक्ष्मीरिति लक्ष्मीधारा सर्वत्रापि गौरी केशवा लक्ष्मी
ब्रह्मणो सरस्वती शंकरो चेति ब्रह्मजो सर्वत्र ब्रह्मणः सरस्वती विष्णोर्लक्ष्मीः शिवस्य गौरी पत्नी
त्योन्यग्निकी रीतिः सर्वेषां रूपकर्माणि मूलवदेवदेव कदाचित्कस्यभेदेव कदाचित्कल्पभेदेन
स्यानभेदेन वा लक्ष्मीतः काली सरस्वत्योः सरस्वत्याः सकाशादि तदेकाल्पाः सकाशादि
तो विष्णोर्ब्रह्मरुद्रो ब्रह्मणो रुद्राद्ब्रह्मविष्णू इत्यपि स्वेच्छादि वशाद्भवन्ति नमानाप्रकारधरा।
णादिस्वरूपस्थितिकर्मकश्चिद्विशेषः पतेसर्वपि सर्वज्ञत्वादि ... तेः तत्तदधिकार

मेयत्वात्तत्किं विद्वत्त्वादिव्यवहारोपि सत्यत्वार्थं ब्रह्मादिनियम्यत्वाच्च एवं ये जीवाः उपासनादि
कर्मणा तत्तल्लोके सारूप्यं प्राप्तास्ते तत्तल्लोकीयब्रह्मवासुदेवादिभिः समानाकारत्वाद्ब्रह्मा
दिसंज्ञाभाजो जीवा एव एषामपि कर्म तद्रूपत्वतदधिकारमात्रं एषां सर्वेषां मूलाभेदेन तद
भेदस्य सत्वेन स्वात्मांशो आवरणहीनतया नैर्ज्ञानेन च साक्षीस्येन स्तुतिर्न विरुद्धा अतएव दे
वीपुराणे एते स्त्रिभिर्बलिर्विष्णुर्वाणादि त्रिपदाथवा उत्पत्तिस्थितिनाशेषु रजादित्रिगुणाथ
वेति त्रिगुणाथवेति त्रिगुणपदनिरुक्तिर्दर्शिता अहं सर्वमिदं भूतं नैवचदेविनसंशयः त
पामयाचदेवेशि ओतप्रोतमिदं जगदिति तत्रैव देवीप्रतिश्रुवचनाच्च अत एवमुव्य महा
लक्ष्म्यादिजन्यब्रह्मादीनामेवोऽस्त्वत्र तद्भेदकत्वतत्पालकत्वादीनि प्रायानिकरहस्येऽथ
उक्तानीति बोध्यं स्वया सह संभूय विविधं चाण्डमजीजनत् विभेद भगवान् रुद्रस्तद्वीर्यीस
हवीर्यनिति अंडमप्येवं सकलं प्राणिजातमभूत्ततः तत्सर्वं पालक्ष्म्या सह जनार्द्दनः संज
हारजगत्सर्वं महाभोगी महेश्वरः एवं चराचरं सर्वं महालक्ष्म्या अभून्महरत्वं हं त्वं च समुत्प
नो ब्रह्मादेवाश्च सर्वं तइति यामले एवं व पृथिवी तत्ताधिष्ठात्स्य भूतद्वेरै योगनिद्रासंपादि
कायाअपि महाकाया अपि महाकाल्या मूलशक्त्यभेदादेवतया स्तूयते सर्वं सा विद्या
परमामुक्ते रित्यादिना क्रियमाणसाक्षीत्येन स्तुतिर्न विरुद्धा एवं जडात्मिकायाः प्रकृते

स॰ श॰
४

श्चैतन्यरूपायाश्चिच्छक्तेश्चाधिष्ठानत्वाधिष्ठेययोरभेदं मत्वा योगनिद्राजगत्पते सैषा प्रसन्ना वरदा
इत्यादिना तत्र तत्र जगच्चितोः सामानाधिकरण्यं अत्र मूलभूतजडशक्तेर्महामायाकुंडलिनीत्या
दिशब्दैर्व्यवह्रियमाणायाः अधिष्ठात्रीचिच्छक्तिरपि तदभेदान्महामायादिसंज्ञाभाक् तथा
चकौर्मे मायावाक्यं नमेनारायणाद्भेदो विद्यते हि विचारतः तन्मयोहं परं ब्रह्म स विष्णुः पर
मेश्वरइति एवं तमोमयी कालीसंज्ञा शक्तिरपि निद्रामोहादिभिः पुरुषज्ञानवरकत्वान्मा
यामहामायेत्युच्यते मूलशक्त्यभेदाच्च सा चेयं शक्तिः शक्तिमताधिष्ठितैवोपास्या अत्र श
क्तस्य शक्तिमत्त्वाश्रयत्वेपि कार्योत्पत्तौ शक्तेरेव प्राधान्यात्तमः शक्तिरुपास्येति व्यवहारस्स
नानुपपत्तिः एवं शक्तितादात्म्यात्तमसोप्याश्रयत्वादिव्यवहारोपि समंजसः उपास्यत्वं च महाकाल्या
दिद्वारा मूलशक्तेरेवेति सर्वं समंजसं अन्यच्च तत्र तत्र वक्ष्यामः अस्य स्तोत्रस्य शापोद्धारो कीलने
त्रयोदशाध्यायं पठित्वा प्रथमं पठेत् ततो द्वादशाद्वितीयौ तत एकादशात्तृतीयावधि क्रमेण प
ठेत्समम्हिरिति शापोद्धारः प्रथमेमध्यमचरित्रे पठित्वा ततः प्रथमतृतीये पठेदिति कीलन
मितिकेचिद्वदंति केरलसांप्रदायनाम्नातत्वमूलं मृग्यं अथ प्रसंगात्स्तोत्रपाठविधिः तत्र वारा
हीतंत्रे आधारे स्थापयित्वा तु पुस्तकं वाचयेत्ततः हस्तसंस्थापनाद्देवि भवेदर्धफलं यतः यावन्न
पूर्यतेध्यायस्तावन्नविरमेत्पठन् यदि प्रमादादध्याये विरामो भवति प्रिये पुनरध्यायमारभ्य पठेत्स ४

वैमञ्जर्मिकृः भवक्रमात्पठेद्धि विधिरः कं पादिकं त्यजेत् तथान्यत्र प्रणवं पूर्वमुच्चार्य स्तोत्रं वा सं
हितां पठेत् अंते च प्रणवं दद्यादित्युवाचादिपूरुषः नमानुसंपठेत् स्तोत्रं वाचिकं न प्रशस्यते
यतः कीलके प्रोक्ते स्तुनाप्यमानेस्मिन् स्तोत्रे संपुटितत्वकेरिति तत्र स्वे पाठनिषेधकं तत्रानि
षेधकं च पुस्तकं वाचनेशास्ते सहस्रादधिकं यदि ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना वि
नापीत्यर्थः ऋषिच्छंदोंगं विन्यस्य पठेत् स्तोत्रं सहस्रादधिकं यदि ततो न्यूनस्य तु भवेद्वाचनं
पुस्तकं विना विनापीत्यर्थं ऋषिच्छंदोंगे विन्यस्य पठेत् स्तोत्रं समाहितः स्तोत्रेन दृश्यते यत्र
प्रणवं न्यासमाचरेत् भीष्मपर्वणि योगीता सा प्रशस्ता कलौ युगे विष्णोः सहस्रनामाख्यं
स्तोत्रं पापप्रणाशनं गजेंद्रमोक्षणं चैव तथा काहणिकस्तवः नारसिंहं तथा स्तोत्रं स्तोत्रं
श्रीरामसंज्ञकं देव्याः सप्तशती स्तोत्रं तथा नामसहस्रकं श्लोकाष्टकं नीलकंठं शैवं नामस
हस्रकं त्रिपुरायाः प्रसादाख्यं सूर्यस्य स्तवराजकं पैंद्रो हि चिंतवो यस्य इंद्राक्षी स्तोत्रमेव च
वैष्णवं च महालक्ष्मी स्तोत्रं सिद्धेन भाषितं भार्गवाख्येन रामेण शास्त्रान्यन्यानिकारणात्
अनेन गीतासप्तशत्यादीनां पापाभाप्यवलभ्यते मुद्रेनाचलचितेन पठितव्यं प्रयत्नतः न
स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेत् न च स्वयं कृतं स्तोत्रं तथान्येन च यत्कृतं यतः क
लौ प्रस्पृ संतिमनि भिर्भाषितं वयत् कीलकं पठेत् अष्टम्यां वा चतुर्दश्यां सप्ताध्यायात्स

स॰ प्रा॰ माहितः ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति इत्थंरूपेण कीलेन महादेवेन कीलितमि
५ ति सप्तशतीस्तोत्रे शिववृषभपतद्दुद्धाराशुभो वैश तिकेरहस्ये ततः कृतांजलिर्भूत्वा स्तु
५ वीत चरितैस्त्रिभिः एकेन वा मध्यमेन नैकेनेतरयोरिह चरितार्धं तु न जपेज्जपन् छिद्रम
वाप्नुयात् स्तोत्रमंत्रैस्स्तुवीतानां यदि वाजगदंबिकामिति प्रर्गलं कीलकं चादौ जपित्वा
कवचं पठेत् जपेत्सप्तशतीं पश्चात्क्रम एष शिवोदितः इतिक्रचिहृष्पने तत्रापिमस्लंम्र
ंप इतिस्तोत्रपठनविधिः ॥ ॥

सं॰ ४५२८

५